Roll No. ..........................  Total No. of Pages : 4

ME2014-15

Total No. of Questions : 26

# उत्तरमध्यमा द्वितीयखण्ड

## विषय कोड : 808

## नव्य व्याकरणम्

## वैकल्पिक चतुर्थ प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

---

**निर्देश: : सर्वे** प्रश्ना: समाधेया: ।

1. अधोलिखितेषु रिक्तस्थानानि पूरयत – 1×5=5

(क) ..................... इति त्रिमुनय: सन्ति।

(पाणिनिकात्यायनपतञ्जलय:/वशिष्ठागस्त्यकपिला:)

(ख) वर्तमानक्रियावृत्तेर्धातो: ..................... स्यात्।

(लट्/लिट्)

(ग) 'भूतपूर्व:' इत्यत्र ..................... समास:।

(अव्ययीभाव:/तत्पुरुष:)

(घ) "द्यावाभूमी" इत्यत्र ..................... समास:।

(द्वन्द्व/कर्मधारय)

(ङ) लकारा: ..................... भवन्ति।

(पंच:/दश:)

2. वाक्येनै**केनो**त्तरं लेख्यम् – 1×5=5

(क) कदा धातोः शप् स्यात् ?

(ख) लुट् लकारः कस्मिन्नर्थे भवति ?

(ग) अदादिधातुभ्यः शप् किं भवति ?

(घ) 'गुपू' रक्षणे धातोः लुटि प्रथमपुरुषैकवचने रूपाणि लिखत।

(ङ) राजदन्तस्य विग्रहः लेख्यः।

3. अधोलिखितेषु वाक्येषु सत्यमसत्यं वा निर्धारणं कुरुत – 1×5=5

(क) पञ्चसप्तत्युत्तरशतं त्रिसहस्रं चाष्टाध्याय्यां सूत्राणि सन्ति।

(ख) अष्टाध्यायी पाणिनिना न प्रणीता।

(ग) संहिता विवक्षामपेक्षते।

(घ) परमराजः इत्यत्र ''राजाहस्सरिवभ्यष्टच्'' इति सूत्रेण टच् प्रत्ययः भवति।

(ङ) दशानां समीपे ये सन्ति ते उपदशाः। इत्यत्र अव्ययीभाव समासः भवति।

4. उचितेन सह योजयत – 1×5=5

| | | | |
|---|---|---|---|
| (क) | अष्टाध्यायी | (*i*) | कात्यायनः |
| (ख) | वार्तिककारः | (*ii*) | पाणिनिः |
| (ग) | माता-पितरौ | (*iii*) | इकारलोपः |
| (घ) | इतश्च | (*iv*) | द्वन्द्वः |
| (ङ) | श्वयतेरः | (*v*) | इकास्याकारः |

5. अधोलिखितेषु सत्यं विकल्पं निर्धारयत – 1×5=5

(क) जुहोत्यादिभ्यः शपः भवति।

(श्लुः/शिप्)

(ख) वाक्त्वचम् इत्यत्र समासः भवति।

(द्वन्द्वः/तत्पुरुषः)

(ग) अवधीत् इति लकारस्य रूपं भवति।

(लङ्/लुङ्)

(घ) महर्षि पतञ्जलिः पुत्रः आसीत्।

(गोणिकायाः/नागिन्याः)

(ङ) वर्तमाने लकारः भवति।

(लिट्/लट्)

6. अव्ययीभाव समासस्य परिभाषा लेख्या। 5

7. "उपशरदम्" इति शब्दस्य लौकिकविग्रहं कृत्वा तत्र टच्विधायकं अव्ययीभावसमासविधायकं सूत्रं च लिखत। 5

8. अव्ययीभावे सहस्य सः विधायकसूत्रं विलिख्य वृत्या व्याख्या कार्या। 10

9. वंशः कतिधा ? वंशस्य कः अर्थः ? 10

10. पञ्चगवम् शब्दस्य विग्रहं कृत्वा केन सूत्रेण कः समासः भवति ? शब्दसिद्धिः कार्यः संक्षेपेण। 5

11. द्रुणसः शब्दस्य विग्रहं कृत्वा नस्य णत्वविधायकसूत्रं लिखत। 2

12. "सुप्रातसुखसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः" इति सूत्रस्य व्याख्या कार्या। 2

13. चित्रगुः शब्दस्य लौकिकमलौकिकविग्रहं विधाय बहुव्रीहिसमासविधायकसूत्रं लिखत। 2

14. "द्यावाभूमी" शब्दस्य विग्रहं विलिख्य ननु इन्द्राग्नी इत्यत्र चित्वादग्निशब्दस्य पूर्वनिपातः किं न स्यात् लिखत। 5

15. पुत्रश्च दुहिता च पुत्रौ इत्यत्र केन सूत्रेण कः समासः भवति ? 1

16. विग्रहः कः ? सः कतिविधः ? साधु व्याख्येयः। 2

17. "अचतुरविचतुर............" इति सूत्रं पूरणीयम्। 2

18. ''मातु:'' ष्वसा इत्यत्र स्वसु: सस्यं ष: केन सूत्रेण भवति ? 2

19. हृदयस्य हृदादेश: केन सूत्रेण भवति ? 1

20. 'सपलाशम्' इत्यत्र सहस्य स: केन सूत्रेण भवति ? 1

21. सतीर्थ्य: इत्यत्र समानस्य स: केन सूत्रेण भवति ? 1

22. ''वैयाकरणाख्यायां चतुर्थ्या:'' इति सूत्रं साधु विवेचनीयम्। 2

23. दशलकारा: लेख्या:। 2

24. बभूव, एधेरन् इति द्वयोरे**कैव** प्रयोग: साधु साधनीय:। 5

25. अधिजगे इति प्रयोग: साधनीय:। 5

26. महर्षिपतञ्जले: संक्षिप्त परिचयो देय:। 5